3. Hafta

# चतुरः काकः

एकस्मिन् वने एकः काकः आसीत्। एकदा सः पिपासया आकुलः अभवत्। सः जलाशयम् अन्वेष्टुं वने इतस्ततः अभ्रमत्, किन्तु सुदूरं यावत् कुत्रापि कमपि जलाशयं न अपश्यत्। अन्ते सः एकं घटम् अलभत। तस्मिन् घटे स्वल्पं जलम् आसीत, अतः सः जलं पातुम् असमर्थः अभवत्। अथ स एकम् उपायम् अचिन्तयत्।

सः दूरात् पाषाण-खण्डानि आनीय घटे अक्षिपत्।

एवं क्रमेण जलम् उपरि समागच्छत्।

स च काको जलं पीत्वा सुखम् अलभत।